E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.322

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# दूतकाव्यपरम्परायां कालिदास-रामभद्राचार्याभ्यां रचितयोः मेघदूत-भृङ्गदूतयोः तुलनात्मकमालोचनम्

**Avijit Das**
**Research Scholar**
**National Sanskrit University, Tirupati, A.P**
**Department of Sahitya &**
**Assistant Professor**
**Department of Sanskrit**
**Dr. Gour Mohan Roy College,**
**Monteswar, Purba Bardhaman,**
**West Bengal, India**
***Email:* *avijitdasavijit1993@gmail.com***
**Mobile: 8972143774**

## संक्षिप्तसारः

संस्कृतदूतकाव्यसाहित्ये दूतसम्प्रेषणं सर्वजनविदितम्। तत्र चेतनाचेतनदूतयोः मध्ये अचेतनदूतानां विशिष्टस्थानमस्ति। अचेतनदूतकाव्यपरम्परायां सर्वप्रथमं दूतकाव्यं भवति कालिदासविरचितं मेघदूतम्, तदनन्तरं धोयिकृतं पवनदूतमिति। परन्तु एतस्मात् पूर्वं वैदिकसाहित्ये अपि अचेतनतत्त्वस्य उल्लेखोऽस्ति। यथा श्यावाश्वऋषिणा रथवीतिनृपस्य कन्यां प्रति रात्रिः दूतीत्वेन प्रेषिता। अचेतनामूर्तदूतकाव्यानि संस्कृतदूतकाव्यपरम्परायाम् अतिमहत्वपूर्णं स्थानं लभन्ते इति। अपि च दूतकाव्यानां मुख्यमुद्देश्यं भवति विरहिप्रणयिनः विरहिप्रणयिनीं प्रति, विरहिण्याः प्रणयिनं प्रति वा सन्देशप्रेषणम् एव। प्राचीनग्रन्थेषु सन्देशविषये उक्तं यत् **'सन्देशस्तु प्रेषितस्य स्ववार्ताप्रेषणं भवेत्'** इति। परवर्तिनि काले तु जैनकविभिः सन्देशकाव्यानां दिक्परिवर्तनं सम्पादितम्। अतः प्राचीनसन्देशकाव्यग्रन्थेषु दृश्यते यत् नायक-नायिकयोर्मध्ये विरहवार्तां तथा प्रेमवार्तां च प्रेषयितुं

कविः दूतं प्रेषयामास इति। अनेनैव ज्ञायते यद् दूतकाव्यस्य अपरनाम सन्देशकाव्यमिति। दूतेन सन्देशप्रेषणमेव दूतकाव्यस्य उपजीव्यः विषयः। गवेषणाक्रमेण अस्माकं स्थिरा धारणा जाता यत् बहुषु दूतकाव्यग्रन्थेषु बहूनि काव्यानि प्राप्यन्ते, तेषु मेघदूतम्, भृङ्गदूतञ्च अन्यतमं वर्तते इति।

मेघदूतस्य सफलतायाः अनन्तरं विभिन्नैः कविभिरपि दूतकाव्यानि प्रणितानि सन्ति। एतेषु दूतकाव्येषु जगद्गुरु-रामभद्राचार्यस्य भृङ्गदूतं विशिष्टतया विराजते। भृङ्गदूतम् इति ग्रन्थस्य प्रणेतुः स्वामिरामभद्राचार्य्यस्य जीवनादिविषये पूर्णं वृत्तान्तमपि उपलब्धम् अस्ति। सः न केवलं कवि आसीत्। अपि तु स लोकप्रियः कथाकारः, समाजसेवकः, सनातनधर्मप्रचारकः, लोकसेवकः, प्रख्यातः दार्शनिकश्चेति। एतां सन्देशवार्तां तु भृङ्गः नामकः दूतः सीतायै ददाति इति। काव्यस्य पूर्वभृङ्गे एकपञ्चाशदधिकद्विशतं श्लोकाः (२५१), उत्तरभृङ्गे च पञ्चाशदधिकद्विशतं श्लोकाः (२५०) सन्ति। अस्य दूतकाव्यस्य दूतः भवति सन्देशप्रणयनकारी भृङ्ग एव। पूर्वभृङ्गे मार्ग-तीर्थस्थान-नगर-वनप्रदेश-नदी-ग्राम-स्त्री-देवदेवी-ऐश्वर्यशक्ति-प्रभृतीनां वर्णनं कृत्वा कविः काव्यं विस्तारयामास। एवञ्च उत्तरभृङ्गनाम्नि द्वितीयभागे किष्किन्धाकाण्डे तु लक्ष्मणेन सह प्रवर्षणपर्वतासीनः सीताविरही रामचन्द्रः स्वमनोमधूपं दूतरूपेण श्रीसीतां प्रति प्रेषयामास।

**कूटशब्दाः** - सन्देशप्रेषणम्, मेघः, भृङ्गः, चेतनतत्त्वम्, अचेतनतत्त्वम्, वार्तावाहकः, दौत्यकर्मः, दूतकाव्यम्।

## ❖ भूमिका

समग्रसाहित्येषु भारतीयसंस्कृतसाहित्यम् अतीवः प्राचीनम् इति लोकविदितमस्ति। तच्च वैदिकलौकिकभेदेन द्विधा विभक्तमिति। लौकिकसाहित्यस्यापरं नाम ललितसाहित्यम् इति कथ्यते। लौकिकसाहित्यं पुनः दृश्यश्रव्यभेदेन द्विविधं भवति। यद् अभिनयप्रधानं तद् भवति दृश्यं, परन्तु यद् श्रवणयोग्यं काव्यं तद् श्रव्यकाव्यमित्युच्यते। पुनः श्रव्यकाव्यं गद्य-पद्य-चम्पूभेदेन त्रिधा विभक्तम्। अतः अस्मिन्नेव लौकिकसाहित्ये महाकाव्य-खण्डकाव्य-नाटक-गद्यकाव्य-पद्यकाव्य-चम्पूकाव्यादीनां उल्लेखः प्राप्यते। संस्कृतसाहित्यस्य ये केचन विभागाः सन्ति तेषु दूतकाव्यसाहित्यम् अन्यतमं विशिष्टं च वर्तते इत्यत्र नास्ति कोऽपि सन्देहः। दक्षिणभारते तथा श्रीलङ्कायाम् ईदृशानि काव्यानि 'सन्देशकाव्यम्' इत्याख्यया व्यवह्रियन्ते। खण्डकाव्यं गीतिकाव्यं वा पाश्चात्याः विद्वांसः 'लिरिक' इति नाम्ना कथयन्ति। गीतिकाव्यं खलु कोमलं तथा मधुरभावं गृहीत्वा सरल-सरस-भाषायां रचितं भवति। सन्देशकाव्ये प्रायः विरहिजनस्य वर्णनं प्राप्यते। यत्तु प्रसादगुणगुम्फितां वैदर्भी रीतिम् आश्रित्य रचितमस्ति। दूतस्यार्थ अमरकोषे स्पष्टरूपेण उक्तः यथा- **"स्यातसन्देशहरो दूतः"**[१] इति । दूतेन सन्देशप्रेषणमेव एषां काव्यानां मुख्यविषयः। अनेनैव ज्ञायते काव्यमिदं सन्देश-काव्यम् दूतकाव्यं वेति। उभयोरर्थ एक एव। साहित्यदर्पणे खण्डकाव्यस्य लक्षणं भवति **"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च"**[२] इति लक्षणानुसारं खण्डकाव्यं भवेत् महाकाव्यस्यैकदेशानुवर्तिः। यथा मेघदूतादि। संस्कृतपद्यसाहित्यपरम्परायां खण्डकाव्यस्य प्रकारद्वयं विद्यते यथा- सन्देशकाव्यं, स्तोत्रकाव्यं च इति। खण्डकाव्येऽस्मिन् नीति-धर्म-शृङ्गार-स्तोत्र-सन्देश-विडम्बनप्रभृतयः विषयाः प्रतिपादिताः सन्ति। अत्र तु नायकः, प्रतिनायकः, ऋतुवर्णनं च अपि प्राप्यन्ते। अतः काव्यमिदं लघुकाव्यमिति नाम्नाभिधीयते। महाकाव्यापेक्षया खण्डकाव्यं सर्वाधिकं माधुर्य्यपूर्णं लालित्यपूर्णं च इति कथ्यते।

संस्कृतसाहित्ये परिगणितं 'गीतिकाव्यम्' इति संस्कृतभारतीषु रमणीयं स्थानमधिरक्षति। अस्य काव्यस्योद्भवः भवति सामवेदः। यस्य प्रमुखं तत्त्वं भवति गेयत्वमिति। विषयेऽस्मिन् कथ्यते

---

**[१] अ. को.- २/८/१६/२/२**

**[२] सा.द.- ६/३२९**

यत्- **‘गायन्ति इति सामगाः’** इति। गीतिकाव्यम् आङ्गलभाषायां ‘लिरिक’ इति शब्दस्य अनुवादरूपेण प्रयुक्तं भवति। संस्कृतखण्डकाव्यं तु गीतिकाव्यपदवाच्यं भवेदिति दिक्। आधुनिकसमीक्षया ज्ञायते यत् खण्डकाव्य-गीतिकाव्ययोर्मध्ये प्रभेदः अस्ति। यत्र खण्डकाव्यं भवेत् वस्तुतवर्णनपरकं, गीतिकाव्यं च आत्माभिव्यक्तिप्रधानम् इति। प्रधानतया गीतिकाव्यस्य भेदत्रयं विद्यते यथा- शृङ्गारिकं, नैतिकं, धार्मिकं च इति। तत्र शृङ्गारिकं भावमूलकगीतपदरूपेण, नैतिकं सूक्तिरूपेण, धार्मिकं च स्तोत्ररूपेण स्वीक्रियते। गीतिकाव्यस्य सुस्पष्टं निदर्शनं भवति ऋग्वेदान्तर्गतम् **उषस्सूक्तमिति**[१]। आदिकाव्ये रामायणे राम-सीतयोः वेदनायुक्तो भावावेगो गीतिकाव्यगुणान्वितः। अनेनैव वक्तुं शक्यते यत् गीतिकाव्यस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं भवति भावमयत्वमेवेति। भारतीयसंगीतसाहित्ये गीतितत्त्वस्य प्राधान्यं महत्त्वं च स्वीक्रियते, तदुक्तं यत्- **“गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते”**[२] इति।

## ❖ दूतकाव्यस्य सामान्यः परिचयः

अस्मिन् प्रपञ्चे सर्वतः प्राचीनग्रन्थः ऋग्वेद इति सर्वे विद्वांसः स्वीकुर्वन्ति। ऋग्वेदः संस्कृतभाषया निबद्धः अस्ति। अतः वक्तुं शक्यते यत् संस्कृतवाङ्मये ऋग्वेदः प्राचीनतमग्रन्थरूपेण विद्यते। एवमेव पुराणसाहित्येऽपि दौत्यपरम्परायाः विकसितरूपं परिदृश्यते। अपि तु महाभारते, ततः परं पुराणसाहित्ये च दौत्यपरम्परायाः दिग्दर्शनं प्राप्यते। अत्रापि श्रीकृष्णस्य दूतकार्यं दौत्यपरम्परायाः उत्कृष्टं निदर्शनमिति। एवं लौकिकसंस्कृतसाहित्यस्य आदिकाव्यं रामायणं सर्वप्रथममुल्लेखनीयम्, ततः परं महाभारतम्। अत्रापि दौत्यपरम्परायाः उदाहरणरूपेण प्रसङ्गद्वयं दृश्येते यथा- हनुमतः दूतकार्यम्, अङ्गदस्य दूतकार्यं च इति। वाल्मीकीये रामायणे किष्किन्धाकाण्डे सीतान्वेषणाय वानराणां प्रस्थानं वर्णितम् अस्ति। सीतान्वेषणाय प्रस्थितायां वानरसेनायां हनुमान् प्रतिभाशाली शक्तिमान्, बुद्धिमतां, बरिष्ठश्च आसीत्। अतः श्रीरामेण हनुमान् दूतरूपेण सीतान्वेषणाय प्रेषितोऽभवत् इति दिक्।

कालिदासस्य मेघदूतम् दूतकाव्यपरम्परायां पथिकृत् इति अनेके विद्वांसः मन्यन्ते। मेघदूतस्य साफल्येन उद्बुद्धाः परवर्त्तिनः अनेके कवयः दूतकाव्यानि रचयामासुः। अस्य निबन्धस्य विषयत्वेन गृहीतं जगद्गुरु-स्वामिरामभद्राचार्यस्य भृङ्गदूतम् अपि दूतकाव्येषु अन्यतमम् वर्तते इति। यद्यपि

---

[१] **ऋ.सं.- १/४८, १/४९, ५/७९, ५/८०**

[२] **स.र. अध्याय-१, पृ.१३**

मेघदूतं शृङ्गारप्रधानं काव्यं, तथापि तदनन्तरं दूतकाव्यस्य विषयवस्तु बहुविधं जातम्। परन्तु काव्यकारः स्वामिरामभद्राचार्यः स्वस्य भृङ्गदूते विशुद्धप्रेममूलकं विषयवस्तु वर्णयति। लौकिकसंस्कृतसाहित्ये दूतकाव्यपरम्परा अतिप्राचीना विपुला चासीत्। प्राचीनषु सन्देशकाव्यग्रन्थेषु दृश्यते यत् नायक-नायिकयोर्मध्ये विरहवार्तां प्रेमवार्तां च सम्प्रेषयितुं कविभिः दूतः नियोजित आसीत्। विरहजर्जरितहृदयस्य सन्देशवचनमेव दूतकाव्यानां प्रतिपाद्यविषय आसीत्। अतः विगतदिनेषु जातस्य मिलनस्य स्मृतिरेव दूतेनाख्यायते।

## ❖ दूतशब्दस्य व्युत्पत्तिलब्धार्थः

दूतशब्दस्य व्युत्पत्तिर्भवति- 'दु-गतौ'+क्त(त)=दूतः[१]। अर्थात् 'दु-गतौ' इति धातोः 'क्त' प्रत्यययोगेन 'दूत' इति शब्दः निष्पद्यते। अस्य दूतस्य मुख्यः उद्देश्यः भवति सन्देशप्रेरणमेव। दूतस्य लक्षणनिरूपणावसरे मनुस्मृतौ आचार्येण मनुनोक्तम्-

**"दूतं चैव प्रकुर्वीत सर्वशास्त्रविशादम्।**

**इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम्।।"**[२] इति।

प्रपञ्चेऽस्मिन् समग्रशास्त्रेषु ऋग्वेद सुप्राचीनतमः ग्रन्थ इति अनेके विद्वांसः स्वीकुर्वन्ति। भारतीयज्ञानविज्ञानस्य सर्वे विषया अपि वेदेषु निहिताः सन्ति। अतः एव संस्कृतवाङ्मयस्य विकाशक्रमे दूतकाव्यस्य संकल्पना ऋग्वेदादेव प्रारब्धा इति मन्यते यथा उक्तं-

**"दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्।**

**यजिष्ठमृञ्जसे गिरा।।"**[३] इति।

ऋग्वेदानुसारेण ज्ञायते यत् नृपस्य रथवीतेः एका कन्या आसीत्। तदा नृपः रथवीतिः कस्मैचित् ऋषये कन्यां संप्रदातुं कृतसङ्कल्पः आसीत्। परन्तु श्यावाश्वः नाम कश्चन राजा तस्याः पाणिग्रहणेऽतीव उत्सुकः बभुव। किन्तु राजा रथवीतिः तामेव कन्यां कस्मैचित् ऋषये संप्रदातुं कृतसङ्कल्पश्चासीत्। तदा राजा श्यावाश्वः दुरूहतपसा ऋषित्वं प्राप्तवान्। तदनन्तरं श्यावाश्वः स्वस्य

---

**[१] अ.को.-२/६/१६**

**[२] मनु.-७/६३-६४**

**[३] ऋ.-४/८/१**

साफल्यं ज्ञापयितुं रात्रिं दूतीरूपेण नियोज्य प्रेयसीमनोरमां प्रति प्रेषयामास। अत्र रात्रिः दूतरूपेण वर्णिता अस्ति। एवमेव ऋग्वेदे सरमा-पणिसंवादसूक्ते, श्रीमद्भागवते, मार्कण्डेयपुराणे, रामायणेऽपि च दूतप्रेरणस्य वर्णनं प्राप्यते एव।

## ❖ दूतचयनम्

दूतकाव्ये विभिन्नैः साहित्यकारैः चेतनाचतनदूतयोः मध्ये सरसा कल्पना सञ्जाता। तत्र चेतनदूतरूपेण मयुरः, भृङ्गः, चातकः, हंसः, पिकः, काकः, कपोतः, वानरः, हरिणः, हनुमान्, चातकः, चक्रवाक, शशकादयः सूच्यन्ते। पुनश्च अचेतनदूतरूपेण मेघः, मानसः, पत्रं, चन्द्रः, मलयः, पवनः, स्वप्नः, प्रज्ञा, स्मृतिः च इत्यादयः निर्दिष्टाः सन्ति। महाकविकालिदासविरचिते मेघदूते अचेतनतत्त्वं, स्वामिरामभद्राचार्यविरचिते भृङ्गदूते च एकं चेतनतत्त्वं दूतरूपेण प्रकटितमभवत्। काव्यद्वये सजीव-निर्जीवदूतयोः नियोजनं कृतम् अस्ति। अतः दूतकाव्यस्य वक्ता कश्चन विरही नायकः, विरहिणी नायिका वा भवति येन दूतहस्ते सन्देश प्रेष्यते इति। दूतकाव्यसाहित्योद्भवस्य पर्यालोचना अतीव आधुनिका एव। प्रकाशितेषु बहुषु दूतकाव्यग्रन्थेषु बहुनि दूतकाव्यानि समुपलभ्यन्ते। दूतेन सन्देशप्रेषणमेव भवति एतेषां दूतकाव्यानां मुख्यः विषयः। सस्कंतकाव्यानां परिशीलनेन ज्ञायते यत् महाकाव्ययुगादनन्तरं लघुकाव्यमिदं परवर्तिनिकाले खण्डकाव्यरूपेणाभिधीयते। साहित्यदर्पणकारेण विश्वनाथेनोक्तम्- **“खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च”**[१] इति।

## ❖ कविपरिचयः

### कालिदासः

न केवलं संस्कृतसाहित्ये अपि तु अखिलविश्वसाहित्ये यस्य कालजयिविजय-वैजयन्ती सगर्वमुड्डीयते स कालिदास एव। कवेः कालनिर्णये यद्यपि मतपार्थक्यं विद्यते, तथापि वक्तुं शक्यते यत् अयं कविः विक्रमसंवत्-प्रथमशतके विद्यमान आसीदिति। कालिदासस्य समयसम्बन्धे मतभेदाः वर्त्तन्ते, तथापि बाह्याभ्यन्तरप्रमाणैः तस्य स्थितिः ईसापूर्व-प्रथमद्वितीयशतकयोर्मध्ये एवेत्यनेके विद्वांसः स्वीकुर्वन्ति। कालिदासस्य देशविषयेऽपि महान् मतभेदः दरीदृश्यते। तथापि विक्रमादित्यस्य

---

**[१] सा.द.-६/३२९**

सभापण्डितस्य कालिदासस्य स्थानं मालवमुख्यनगरी उज्जयिन्येवेति समर्थ्यते। यथा-कविकालिदासस्य सूक्ष्मदर्शनेन मेघदूते उज्जयिन्याः या भौगोलिकस्थितिः समुपवर्णिता, सा तद्देशवासित्वे एव सम्भवति। कुमारदासस्य विषये एका कथा अस्ति। कुमारदासेन सह कालिदासस्य सख्यमासीत्। कालिदासः कुमारदासनिवासं सिंहलं भूषयति स्म। मेघदूते कालिदासेन विरहिणो जनस्य मनःस्थितेर्वर्णना कृता। कालिदासकृतेषु ग्रन्थेषु वैदर्भीरीतेः प्राधान्यमस्ति। अत उच्यते- "**वैदर्भीरीतिसन्दर्भे कालिदासः प्रगल्भते**" इति। विदर्भः नाम देशः दक्षिणभारते अस्ति। अतः कालिदास विदर्भस्य तथा दक्षिणभारतस्य एकः प्रख्यातः कवि आसीत्। कविप्रणीते काव्ये, नाटके चापि काश्मीरप्रदेशस्य प्रसाधनद्रव्याणाम् उल्लेखः अस्ति। एतद्व्यतीतं कविकृतेषु विविधेषु काव्येष्वपि हिमालयपर्वतस्थितानां विविधानां वृक्षाणां तथा प्राणिकुलानां वर्णनं प्राप्यते। अत अनेके मन्यन्ते यत् सः काश्मीरप्रदेशस्य तथा हिमालयसन्निहितायाः कस्याश्चित् नगर्याः कवि आसीत्। कालिदासरचिते मेघदूते मालवप्रदेशस्य वर्णनम् अस्ति। एवमेव तस्य रचनायां उज्जयिन्यीसन्निहितानां पर्वतानां तथा नदीनाम् अपि वर्णनं प्राप्यते। कवेः समीपे इयं नगरी स्वर्गतुल्यैव असीत्। कविप्रणीते मेघदूते उज्जयिनीस्थितस्य महाकालमन्दिरस्य सन्ध्यारतेः वर्णनम् उल्लिखितम् अस्ति। अस्मिन्नेव नगर्यां कवि कालिदासः विक्रमादित्यस्य सभाकवि आसीत्। अत इयं नगरी एव कवेः जन्मभूमि इति मन्यते।

### ❖ स्वामिरामभद्राचार्यः

जगद्गुरुः स्वामिरामभद्राचार्य एकः प्रख्यातः विद्वान्, शिक्षाविद्, बहुभाषाविद्, रचनाकारः, प्रवचनकारः, दार्शनिकः, हिन्दुधर्मगुरुश्च अस्ति। स उत्तरप्रदेशनगर्याः जौनपुरजनपदान्तर्वर्तिनि शाण्डिखुर्दनामके ग्रामे १९५० ईशवीयाब्दे जनवरीमासे १४ तमे दिनाङ्के मकरसङ्क्रान्तौ माघकृष्णैकादशीतिथौ वैवस्वतवासरेवशिष्ठगोत्रीये सरयूपारीणविप्रामालकुले श्रीराजदेवमिश्रस्य चतुर्थापत्यरूपेण श्रीमत्याः शचीदेव्याः दक्षिणकुक्षितः अजायत। पूर्वाश्रमे तस्य नाम आसीत् ड. गिरिधरलालमिश्रः। जन्मनः परं द्वितीये मासे तस्य दृष्टिः चिराय विनष्टा अभवदिति। १९५० ईशवीयाब्दस्य मार्चमासस्य २४ तमे दिनाङ्के तस्य नेत्रयोः संक्रमणं जातम्। तदा ग्रामे यथोपयुक्तचिकित्साव्यवस्था नासीत्। तदनन्तरं तस्य नेत्रयोः चिकित्सा कृता, किन्तु दृष्टिः पुनः प्राप्तुं न शक्या। सः चित्रकूटस्थितस्य तुलसीपीठस्य मुख्यः प्रवर्तकः अस्ति । एवञ्च

विकलाङ्गविश्वविद्यालयस्य प्रतिष्ठाता कुलाधिपतिः च अस्ति, आजीवनं तथा स्थास्यति। द्वाविंशतिभाषासु सः वक्तुं शक्नोति अपि च भोजपुरी-हिन्दी-संस्कृतभाषास्वपि एकः सुदक्षः कविः लेखकः च अस्ति। चत्वारिंशदधिकद्विशतानि पुस्तकानि पञ्चाशत् प्रबन्धाश्च तेन लिखितानि सन्ति। २०१५ तमे वर्षे भारतसर्वकारेण रामभद्राचार्यमहोदयः **'पद्मविभूषण'** इत्युपाधिना सम्मानित अभवत्।

## ❖ मेघदूतस्य वैशिष्ट्यम्

दूतकाव्यसाहित्ये मेघदूतं सर्वप्रथमं दूतकाव्यम् अस्ति। मेघदूतमेव सर्वेषां दूतकाव्यानां मार्गप्रदर्शकस्वरूपम् अस्ति। खण्डद्वयात्मकस्य मेघदूतस्य प्रणेता महाकविः कालिदासः इति सर्वे विद्वांसः जानन्ति एव। खृष्टपूर्वप्रथमशताब्द्यां मेघदूतकाव्यस्य रचना जाता। मन्दाक्रान्ताछन्दे विरचिते मेघदूतकाव्ये काव्यकलायाः लालित्यं स्पष्टम् अनुभूयते इति। एवमेव महाकविघटखर्परकृतं घटखर्परकाव्यम् अपि प्राचीनतमं दूतकाव्यम् अस्ति। घटखर्पर-कालिदासौ विक्रमादित्यस्य सभायाम् अलङ्कारभूतौ आस्ताम्- **"धन्वन्तरि-क्षपणकामरसिंह-शङ्क-बेतालभट्ट-घटखर्पर-कालिदासाः"** इति ज्ञायते। एतन्मतानुसारं उभौ समसामयिकौ एव इति नास्ति कोऽपि सन्देहः। घटखर्परकाव्ये काचित् विरहिणी प्रियं प्रति मेघं दूतरूपेण प्रेषयति, मेघदूते तु कश्चित् विरही यक्षः प्रियां प्रति मेघं दूतरूपेण प्रेषयति। मेघदूते यदा यक्षः कुवेरस्य शापेन प्रियायाः विच्छिन्नः सन् रामगिरौ निवसति, तदा स यक्षः स्वीयं दूतं मेघं प्रति एवं स्तौति-

**"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।**" इति।[1]

अनेनैव ज्ञायते यत् घटखर्परः कालिदासस्य प्रतिपक्ष आसीद् इति। परन्तु उभयोः काव्ययोः मध्ये कस्य दूतकाव्यस्य प्राथम्येन सूचनं कृतम् इति विषये अतीवः कौतूहलं जातम्। एवञ्च कालिदासविरचितस्य दूतकाव्यस्य परं विभिन्नैः कविभिः विविधानि दूतकाव्यानि संस्कृतभाषायां विरचितानि। सन्देशप्रेषणस्य प्रवृत्तिः पुराणेषु, रामायणे, महाभारते चापि दृश्यते। यथा नलचरिते

---

[1] **मे.दू (पू.मे-१)**

हंसेन, महाभारते कृष्णेन, रामायणे हनुमता च संवादप्रेषणस्य उदाहरणानि दृश्यन्ते। अतः रामायणमवलम्ब्य कालिदासेन 'मेघदूतम्' विरचितम्। मेघदूतमिति खण्डकाव्ये कालिदासस्य अयं श्लोकपादः मल्लिनाथस्य अभिप्रायं समर्थयति तद्यथा- **'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा'** इति। संस्कृतदूतकाव्यपरम्परायाम् आदिकविः वाल्मीकिः येषां आदर्शाणां प्रतिष्ठां चकार, कालिदासरचनासु तेषां विकसितं रूपं स्पष्टमेव परिदृश्यते। अतः कवेः कालिदासस्य वाह्याभ्यन्तरयोः मध्ये एतादृशः मधुरः समन्वयः जातः। अनेनैव कविः कालिदासः कुलगुरु इति उपाधिना अलङ्कृतः अभवत्। वाल्मीकिः यथा आदिकवि इति परिचीयते, तथैव कालिदासोऽपि आदिदूतकाव्यकारः आदिगीतिकारः वेति परिचीयते- इत्यस्मिन् विषये नास्ति कोऽपि सन्देहः।

अस्य काव्यस्य प्रेरणात्मक आधारभूतः ग्रन्थः रामायणम् एव इति टीकाकारेण मल्लिनाथेन प्रतिपादितमस्ति। रामायणमवलम्ब्य कृतमपि इदं खण्डकाव्यं स्वीयां मौलिकतां कदापि न त्यजति। पुराणेतिहासप्रथितं वृत्तमादायैव माघेनापि शिशुपालवधं प्रणीतमस्ति। अत एव तस्य मौलिकत्वम् अक्षतमेव। काव्यशास्त्रकारेण विशिष्टाचार्येण भामहेन निर्दिश्यते यत्-

**"अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः।**
**तथा भ्रमरहारीतचक्रवाकशुकादयः।।**
**अवाचोऽयुक्तवाचश्च दूरदेशविचारिणः।**
**कथं दूत्यं प्रपद्येरन् इति युक्त्या न युज्यते।।"**[१] इति।

कालिदासेन अनेकानि काव्यानि प्रणीतानि सन्ति। तत्र दूतकाव्यरूपेण काव्यद्वयं वर्तते- मेघदूतम्, ऋतुसंहारञ्चेति। 'मेघदूतम्' इत्याख्यं गीतिकाव्यं भागद्वये विभक्तम्, तद्यथा- पूर्वमेघः उत्तरमेघश्चेति। अस्मिन् मेघदूतकाव्ये यक्षस्य आख्यानमङ्कितम् अस्ति। प्रकृतेः विभिन्नानि सुन्दराणि चित्राणि पूर्वमेघे वर्णितानि इति दृश्यन्ते। प्रकृतेः चेतनरूपं कालिदासरचनायाम् उपलभ्यते इति। मेघदूते प्रकृतिं प्रति प्रेम सम्यग्प्रकारेण कविना व्यक्तम्। मेघस्य संवेदनशीलतया यक्षः विशेषरूपेण प्रभावित अभवत्। सः मन्यते यत् दूतरूपेण मेघः तस्य कामवेदनां यथार्थरूपेण प्रियायै निवेदयिष्यति।

---

**[१] का.ल.-१/४२-४३**

पूर्वमेघे आदितः अन्तपर्यन्तं बाह्यप्रकृतेः चित्रणं दृश्यते, उत्तरमेघे तु अन्तःप्रकृतेः चित्रणं प्राधान्येन विद्यते। तत्र हि पूर्वमेघे कश्चिदभिशप्तः यक्षः स्वप्रियायाः वियुक्तः सन् रामगिरिपर्वते वासं चकार। तत्र आषाढस्य प्रथमदिवसे आकाशे भ्रमन्तं मेघखण्डं दृष्ट्वा सः स्वप्रियायै सन्देशं प्रेषयितुमैच्छत्। प्रसङ्गेऽस्मिन् कविनोक्तम्-

**“कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**

**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**

**स्निगधच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥”**[२] इति।

अनन्तरं यक्षः रामगिरे आरभ्य अलकापुरीं यावत् मार्गं मेघस्य समीपे वर्ण्ययति। मेघदूतकाव्ये यक्षस्य मुखात् अलकानगर्याः अपरूपवर्णनं प्राप्यते। येन मार्गेण मेघेस्य गन्तव्यं भवति- मालदेशः, आम्रकूटः, नर्मदा, दशार्णः विदाशा, वेत्रवती, नीलगिरिः, निर्विन्ध्या, सिन्धुः, अवन्ती, विशाला, उज्जयिनी च। ततः शिप्रा, गम्भीरा, देवगिरिः, चर्मण्वती, दशपुरम्, ब्रह्मावर्तः, कुरुक्षेत्रः, सरस्वती, गङ्गानदी, हिमालयः, कैलासः, मानससरोवरम्, अलका च निर्दिष्टाः। काव्येऽस्मिन् दृश्यते यत् प्राकृतिकवस्तुभिः सह मानवहृदयं सुसम्बद्धम् इति कविना कल्पितम् अस्ति। दूतमुखेन उद्घोषितम् अलकानगर्याः प्राकृतिकसौन्दर्यं तथा सरसमनोहारी दृश्यं मेघदूतकाव्ये कविना कालिदासेन विस्तरेण वर्णितम् अस्ति। तद्यथा-

**“मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां,**

**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**

**गर्भाधान-क्षण-परिचयान्नूमाबद्धमालाः**

**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।।”**[१] इति।

अतः पूर्वमेघे अलकां यावत् मेघस्य मार्गवर्णनं कालिदासेन कृतमस्ति। उत्तरमेघे तु अलकायाः सौन्दर्यवर्णनं, यक्षगृहस्यवर्णनं, विरहपीडितायाः यक्षकान्तायाः वर्णनं तथा यक्षस्य

---

**[२] मे.दू (पू.मे-१)**

**[१] पू.मे.-९**

सन्देशवर्णनं च अपि उपलभ्यते। अतः प्रकृतेः उद्दीपनरूपं माधुर्यं मेघदूते कविना चित्रितम्। एवमेव यक्षः मेघाय स्वगृहस्य परिचयं ददाति। सः वदति यत् गृहस्य उपवने माधवीमण्डपस्य समीपे द्वौ वृक्षौ स्तः - रक्ताशोकः केसरश्च (बकुलः च) इति। यक्षवधूं विना तयोः द्वययोः वृक्षयोः पुष्पाणि अपि न धारणं कुर्वन्ति इति।

**"रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः**

**प्रत्यासन्नो कुरबकवृतेः माधवीमण्डपस्य।**

**एकः सख्यास्तव सह मया वामपादाभिलाषी**

**काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः।।"**[२] इति।

अतः बहुषु स्थानेषु अयं मेघः कविप्रति सहानुभूतिशील इति चित्रितः। प्रकृतेः अस्मिन् चित्रणे कालिदासेन अपूर्वा सफलता प्राप्ता। अत्र यक्षः मेघं प्रति उक्तवान् यत्- एकदा सः स्वप्ने प्रियादर्शनं प्राप्य तां गाढम् आलिङ्गितुं यदा हस्तौ प्रसारयति, तदा तस्य अवस्थां दृष्ट्वा वनदेवता अपि रुदन्ति। तद्यथा-

**"मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-**

**र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।**

**पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां**

**मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति।।"**[३] इति।

अतः कालिदासकृते मेघदूते काव्ये प्रकृते अत्यन्तं सुन्दरचित्रं वर्णितम् अस्ति। मेघदूते रामगिरिः, आम्रकूटः, कैलासश्च इत्यादीनां पर्वतानां वर्णनं दृश्यते। अत्र प्रकृति-मानवयोः मध्ये अभिन्नः सम्बन्धः अपि वर्णितः अस्ति।

## ❖ भृङ्गदूतस्य वैशिष्ट्यम्

एवमेव स्वामिरामभद्राचार्यप्रणीतेषु दूतकाव्येषु भृङ्गदूतम् अन्यतमं दूतकाव्यम् अस्ति। अस्य काव्यस्य उत्सः भवति रामायणस्य किष्किन्धाकाण्ड इति। वाल्मिकिना कृतं रामायणं

---

[२] उ.मे.-१८

[३] उ.मे.-४५

लौकिकसंस्कृतसाहित्यस्य उपजीव्यं काव्यस्वरूपम् अस्ति। स्वामिरामभद्राचार्यः भगवान् श्रीरामचन्द्रस्य एक उपासक अस्ति । अत वाल्मिकिः तस्य पथप्रदर्शकः आसीत् इति भृङ्गदूतकाव्ये दृश्यते इति। काव्येऽस्मिन् वाल्मिकेः प्रभावः सुस्पष्ट एव अस्ति। काव्यस्य प्रथमखण्डे भृङ्गं दूतम् उद्दिश्य भगवान् रामः कथयति-

**“यस्मिन्नित्यं प्रकृतिवनिता बद्धसर्वर्तुसख्या**

**श्रीमत्सख्या विहरति हरिद्रत्नमत्प्रत्नसख्या।**

**रामारामं पिककपिशुकोद्गीतरामाभिरामम्**

**गतासि त्वं श्रुतिकलगिरा भारतं भारतं तत्।।”**[१] इति।

अर्थात् “हे मित्र! यस्मिन् भारतवर्षे नारायणसहचारिणी लक्ष्मीस्वरूपा, नीलमणिमिव सुन्दरी, ममः चिरन्तनमित्ररूपा श्रीसीता वसति, यया सह सर्वे ऋतवः मैत्रीपूर्णं व्यवहारं कुर्वन्ति, या च तादृश्याः प्रकृतिसुन्दर्याः मध्ये निरन्तरं विहरति। तस्मात् त्वं तस्मिन् आध्यात्मिकगुणसमृद्धे भारतवर्षे मधुरेण स्वरेण अवश्यं गानं कुरु, यत्र देव्याः सीतायाः क्रीडावनमिव रमणीये वातावरणे पिकस्वरूपः महर्षिवाल्मीकिः, कपिस्वरूपः श्रीहनुमान्, तथा शुकस्वरूपः श्रीशुकाचार्यः मम (रामस्य) मनोहरं चरित्रं गायन्ति”।

कविरामभद्राचार्येण रचितं दूतकाव्यमिदं २००४ तमे वर्षे प्रकाशितम् अभवत्। संदेशकाव्यपरम्परायाम् इदम् एकम् आधुनिककाव्यमस्ति। काव्यमिदं पूर्वभृङ्गोत्तरभृङ्गाभ्यां द्विधा विभक्तम् अस्ति। अस्य काव्यस्य मुख्यविषयः रामसीतयोः संवाद अस्ति। भगवतः रामचन्द्रस्य सन्देशं नयति कश्चन दूतः सीतायै नयति। एतां सन्देशवार्तां तु भृङ्गः नामकः दूतः सीतायै ददाति। मन्दाक्रान्ताछन्दसा रचितं समग्रं भृङ्गदूतकाव्यं भक्तिप्रधानं दूतकाव्यमिति कथ्यते। काव्यमिदं मेघदूतमवलम्ब्य विरचितम्। अतः मेघदूतमनुसृत्य पञ्चाशदधिकद्विशतानि, ततोऽप्यधिकानि वा दूतकाव्यानि रचितानि सन्ति। भृङ्गदूतकाव्यस्य नायकः सूर्यवंशोत्पन्नः रघुकुलभूषणः दशरथपुत्रः भगवान् श्रीराम एव अस्ति। काव्यस्य प्रारम्भे प्रथमे श्लोके मानवमर्यादासम्पन्नं रामं प्रति कवेः स्तुतिः दृश्यते यथा-

---

[१] **भृ. दू. (पू.भृ-२७)**

**“रामोरामारमितचरितोऽप्यार्य मर्यादयाप्तं**

**पाद्मेः पद्मे पविमिव वहन् मूर्ध्नि शापं स्वतापम्।**

**नीत्वा बाणानलशलभतां वालिनं वानरेशं**

**कृत्वा मैत्रिं सहरिजिदरिः श्रावणेऽध्यास्त शैलम्।।”**[२] इति।

अस्मिन् काव्ये प्रियाविरहेण सन्तप्तः भगवान् रामचन्द्रः स्वकीयां वार्तां श्रीसीतायाः समीपं प्रेषणार्थं भृङ्गं दूतरूपेण प्रेषयति। अतः विप्रलम्भशृङ्गारस्य स्पष्टप्रकाशनाय मन्दाक्रान्ताछन्दः प्रयुज्यते। अस्य काव्यस्य दूतः भवति सन्देशप्रणयनकारी भृङ्ग एव भवति। अत्र मार्ग-तीर्थस्थान-नगर-वनप्रदेश-नदी-ग्राम-स्त्री-देवदेवी-ऐश्वर्यशक्त्यादीनां वर्णनं कृत्वा कविः काव्यं विस्तारयामास। अत्र कविः रामभद्राचार्यः भृङ्गदूतमिति दूतकाव्ये माधुर्य-ओज-प्रसादगुणानां समुचितं प्रयोगविन्यासं कृतवान्। एवं गुणविन्यासेन कविः महतीं सफलतां प्राप्नोति एव।

भृङ्गदूतम् इति दूतकाव्यं खण्डकाव्यरूपेण अपि परिचीयते। सीताविरही रामचन्द्रः स्वप्रियां श्रीसीतां प्रति भृङ्गदूतेन स्वविरहदशायाः मार्मिकतरं सन्देशं प्रेषयामास। तत्र पूर्वभृङ्गे एकपञ्चाशदधिकं द्विशतं श्लोकाः (२५१), एवञ्च उत्तरभृङ्गे पञ्चाशदधिकं द्विशतं श्लोकाः (२५०) सन्ति। अतः भृङ्गदूते एकाधिकं पञ्चशतकं श्लोकाः (५०१) सन्ति। अस्मिन् काव्ये नायकनायिके रामसीते स्तः। तथाहि धर्मपरायणां कोमलहृदयां धर्मपत्नीं सीतां प्रति भगवतः रामचन्द्रस्य वदनाब्जनिःसृताभारती यथा -

**“यद्यप्यस्य क्षणमपि तया नादिशक्त्या खरारे-**

**र्वीच्ये वापां क्वचिदपि हरेर्नो वियोगस्तथापि ।**

**लीलारङ्गेऽप्यवनिसुतया वर्जितः पर्वणीव**

**ग्रस्तज्योत्स्नो नभसि तमसा रामचन्द्रो न रेजे”।।”**[१] इति ।

पुरुषोत्तमः श्रीरामचन्द्रः स्वमनोमधुपं स्वहृदयस्य विरहव्यथाम् एवं कथयति-

**“तत्त्वं प्रेयो विरहजलधौ दुस्तरे दूरतीरे**

---

[२] **भृ. दू. (पू.भृ-१)**

[१] **भृ. दू. (पू.भृ-३)**

**संमज्जन्त्या व्यसनपवनोद्विग्ननावः प्रियायाः।**

**भूयो भूयाः प्लव इव भवो मन्मनोभृङ्गदेव्याः**

**प्राहुः प्रैष्ठं विशदमगदं वाचिकं ह्यातुरायै"।।**[२] इति ।

भृङ्गदूतस्य 'उत्तरभृङ्ग'नाम्नि द्वितीये भागे किष्किन्धाकाण्डे लक्ष्मणेन सह प्रवर्षणपर्वते आसीनः सीताविरही रामचन्द्रः स्वमनोमधूपं दूतरूपेण रावणेन अपहृतां श्रीसीतां प्रति प्रेषयामास स्वकीयां मनोव्याथां ज्ञापनार्थम् । प्रसङ्गेऽस्मिन् कविना उक्तम् -

**"सीताशोकतृषिखजलदं वेगसंविग्नवातं**

**रातं रात्रा निखिलजगतां शान्तये संवृणेऽहम्।**

**रामो रामामवितुमरितो जीवजीवातुवाक्यैः**

**संदेशार्थैः पुनरपि मनोभृङ्ग दुतोत्तरे त्वाम्"।।**[३] इति ।

काव्येऽस्मिन् विरहिणः रामचन्द्रस्य सन्देशः तु मिथिलायोध्ययोः स्थिताः नदीः, तदनु ऋष्यमूकपर्वत-कर्णाटक-आन्ध्रप्रदेश-मद्र-केरलादीनिस्थानानि च यथाक्रमं समतिक्रम्य लङ्कां प्रति जगाम इति दिक्।

## ❖ सादृश्यम्

१. उभयत्र तु मन्दाक्रान्ता छन्दः वर्तते एव।

२. अनयोः काव्ययोः सन्देशप्रणयनकारी दूतः नायकेन नायिकां प्रति प्रेरितोऽभवत्।

३. मेघदूते यथा मेघः अचेतनतत्त्वरूपेण प्रतिभाति, तथैव भृङ्गदूतेऽपि वार्तावाहकः भ्रमरः रामचन्द्रमनसः प्रतीकत्वेन राजते ।

४. अनयोः दूतकाव्ययोः आरम्भस्तु 'कश्चित्' इति शब्देन भवति।

५. उभयत्र तु मार्गरूपेण तीर्थस्थान-वनप्रदेश-नदी-नगर-ग्राम-देवगिर्यादीनां वर्णनं प्राप्यते।

६. उभयं दूतकाव्यं एव पूर्वोत्तरभेदेन द्विधा विभक्तम् अस्ति।

७. मन्दाक्रान्ताछन्दसा विरचितयोः काव्ययोः काव्यकलालालित्यम् अनुभूयते इति।

---

[२] भृ. दू.(पू.भृ-१९)

[३] भृ. दू.(उ.भृ-१)

## ❖ वैसादृश्यम्

१. स्वामिरामभद्राचार्यप्रणीते भृङ्गदूते नायकनायिके स्तः रामसीते इति। परन्तु कालिदासप्रणीते मेघदूते नायकः यक्षः, नायिका तु विरहिणी यक्षप्रिया च।

२. मेघदूतकाव्यस्य श्लोकसंख्याः भवन्ति पञ्चदशाधिकं शतकम् (११५) इति। परन्तु भृङ्गदूतस्य श्लोकसंख्या एकाधिकं पञ्चशतकम् (५०१) इति।

३. भृङगदूतकाव्ये भगवान् रामचन्द्रः स्वमनोमधुपं दूतरूपेण रावणेनापहृतां श्रीसीतां प्रति प्रेषितवान्। मेघदूतकाव्ये तु अभिशप्तः यक्ष आकाशे सञ्चरन्तं मेघखण्डं दूतरूपेण स्वप्रियां प्रति प्रेषितवान्।

४. कविकालिदासप्रणीते मेघदूतमिति दूतकाव्ये यक्षस्य सन्देशः माल-आम्रकूट-नर्मदा-दशार्ण-विदाशा-वेत्रवती-नीलगिरि-निर्विन्ध्या-सिन्धु-अवन्ति-विशाला-उज्जयिनी-शिप्रा-गम्भीरा-देवगिरि-चर्मण्वती-दशपुर-ब्रह्मावर्त-कुरुक्षेत्र-सरस्वती-गङ्गानदी-हिमालय-कैलाश-मानससरोवरादीन् प्रदेशान् अतिक्रम्य इति क्रमेण अलकां प्रति गच्छति। परन्तु भृङगदूते रामचन्द्रस्य सन्देशः मिथिला-अयोध्या-ऋष्यमूकपर्वत-कर्णाटक-आन्ध्रप्रदेश-मद्र-केरलादीन् अतिक्रम्य क्रमेण लङ्कां प्रति प्रेष्यते।

५. मेघदूते दूतः भवति अचेतनः पदार्थः मेघ एव। यः यक्षस्य सन्देशवाहकत्वेन निरूपितः अस्ति। भृङ्गदूते तु दूतः चेतनः प्राणी भृङ्गः एव, यः रामचन्द्रस्य सन्देशं वहति।

## ❖ उपसंहारः

एवमेव काव्यद्वयं भाषा-भाव-रस-छन्दालङ्कारादिगुणैः यथार्थतया समलङ्कृतं परिपूर्णं च दृश्यते। अत्र कविकुलगुरुणा कालिदासेन मालविकाग्निमित्रनाटके उक्तमस्ति-

**“पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।**

**सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥”**[1] इति।

परन्तु कालिदासप्रणीते मेघदूते कतिपयेषु वर्णनेषु अश्लीलतादोषः परिलक्ष्यते, यथा-

**“प्रस्थानं ते कथमपि सखे ! लम्बमानस्य भावि ।**

**जातास्वादो विवृतजघनां को विहातुं समर्थः।।”**[2] इति।

---

[1] **मालविकाग्निमित्रम्- १/२**

[2] **मे.दू.- पू.मे/४१**

अतः मेघदूते सम्भावितोऽयं दोषः भृङ्गदूते न क्वचिदपि प्राप्यते। परन्तु नायकनायिकयोर्मध्ये दूतरूपेण सन्देशप्रेषणस्य अभिनवा कल्पना महाकविकालिदासस्य मौलिकप्रज्ञायाः परिचायिका वर्तते।

## ❖ सन्दर्भग्रन्थसूची


1. महाकविः कालिदासः, *मेघदूतम्*, सम्पा. दयाशङ्कर शास्त्री, सुरभारती प्रकाशन, चौखम्बा, वाराणसी,

   २०१४
2. स्वामी रामभद्राचार्यः, *गीतरामायाणम्* , जगद्गुरु रामभद्राचार्य विकलाङ्ग विश्वविद्यालय, चित्रकूट,

   उत्तरप्रदेश, प्रथम संस्करणम्- २०११
3. स्वामी रामभद्राचार्यः, *भृङ्गदूतम्* , जगद्गुरु रामभद्राचार्य विकलाङ्ग विश्वविद्यालय, चित्रकूट, उत्तर प्रदेश,

   विक्रम संवत् २०६१
4. श्रीचिन्ताहरणचक्रवर्ती शर्मा, *मनोदूतम्*, संस्कृतसाहित्यपरिषद, कलिकाता, १८५६
5. आचार्य बलदेव उपाध्याय, *संस्कृत साहित्य का इतिहास*, चौखम्बा, विद्याभवन, वाराणसी, २०१४
6. महाकविः कालिदासः, *मेघदूतम्*, (हिन्दी-गद्य भावार्थ अनुवाद), सम्पा. ले. महावीर प्रसाद द्विवेदी, प्रका.

   इण्डियन प्रेस, लिमिटेड, इलहाबाद, द्वितीय संस्करण-१९२४
7. आचार्य बलदेव उपाध्याय, *संस्कृत साहित्य का इतिहास*, शारदा निकेतन वाराणसी, दशम संस्करण, २००१
8. लोकमणि दाहालः, *संस्कृतसाहित्येतिहासः*, वाराणसीः, चौखाम्बा कृष्णदास अकादमी, २०१६
9. श्रीचिन्ताहरणचक्रवर्ती शर्मणा, *मनोदूतम्*, कलिकाताः, संस्कृत-साहित्य-परिषद, १८५६
10. डॉ. रामकुमार आचार्य, *संस्कृत के सन्देशकाव्य*, संस्कृत विभाग, राजकीय कोलेज, अजमेर, १९६३
11. महाकविः कालिदासः, *मेघदूतम्*, सम्पा. दयाशङ्कर शास्त्री, वाराणसी, चौखम्बा, सुरभारती प्रकाशन २०१४

12. कपिलदेव द्विवेदी, *संस्कृत साहित्य का समीक्षात्मक इतिहास*, इलाहाबाद, विद्या प्रकाशन, २००१

13. श्रीविश्वनाथकविराजः, *साहित्यदर्पणः*, चौखाम्बा विद्या भवन, वाराणसी, १९७७

14. जगद्गुरु रामभद्राचार्य, *श्रीमद्भगवद्गीता*, श्रीतुलसीपीठसेवान्यास, तुलसीपीठ, चित्रकूट, सतना (म.प्र), १९९८

15. तुलसीदास, श्रीरामचरितमानस, सम्पा. स्वामी रामभद्राचार्य जी महाराज, (भावार्थबोधिनी हिन्दि टीका)

    श्रीरामचरितमानस अनुसंधान केन्द्र,जगद्गुरु रामभद्राचार्य विकलांग विश्वविद्यालय, चित्रकूट, उत्तरप्रदेश, विक्रम संवत् २०६५

16. Arthur Anthony Macdonell, *A History of Sanskrit Literature*, Motilal Banarsidas Publishers Pvt. Ltd., Delhi-1971.

17. A. Berriedale Keith, *A History of Sanskrit Literature*, Motilal Banarsidas, Publishers Private Limited, Delhi, 1993.

18. Gaurinath Shastri, *History of Classical Sanskrit Literature*, Motilal Banarsidas, Delhi, 1974.

19. Dr. Jatindra Bimal Chaudhuri, *History of the Dūtakāvyas of Bengal*, Pracyavani 3, Federation Street, Kolkata, 1953